# shrIgokuleshAShTakam

# શ્રીગોકુલેશાષ્ટકમ્

## Document Information

Text title : gokuleshAShTakam

File name : gokuleshAShTakam.itx

Category : aShTaka, vishhnu, krishna, vishnu, puShTimArgIya, raghunAthajI

Location : doc_vishhnu

Author : Raghunathaji

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# shrIgokuleshAShTakam

# શ્રીગોકુલેશાષ્ટકમ્

નન્દગોપભૂપવંશભૂષણં વિભૂષણં var વિદૂષણં
ભૂમિભૂતિભુરિભાગ્યભાજનં ભયાપહમ્ ।
ધેનુધર્મરક્ષણાવતીર્ણપૂર્ણવિગ્રહમ્
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૧॥

ગોપબાલસુન્દરીગણાવૃતં કલાનિધિં
રાસમણ્ડલીવિહારકારિકામસુન્દરમ્ ।
પદ્મયોનિશઙ્કરાદિદેવવૃન્દવન્દિતં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૨॥

ગોપરાજરત્નરાજિમન્દિરાનુરિઙ્ગણં
ગોપબાલબાલિકાકલાનુરુદ્ધગાયનમ્ ।
સુન્દરીમનોજભાવભાજનામ્બુજાનનં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૩॥

કંસકેશિકુઞ્જરાજદુષ્ટદૈત્યદારણં
ઇન્દ્રસૃષ્ટવૃષ્ટિવારિવારણોદ્ધૃતાચલમ્ ।
કામધેનુકારિતાભિધાનગાનશોભિતં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૪॥

ગોપિકાગૃહાન્તગુપ્તગવ્યચૌર્યચઞ્ચલં
દુગ્ધભાણ્ડભેદભીતલજ્જિતાસ્યપઙ્કજમ્ ।
ધેનુધૂલિધૂસરાઙ્ગશોભિહારનૂપુરં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૫॥

વત્સધેનુગોપબાલભીષણોત્થવહ્નિપં
કેકિપિચ્છકલ્પિતાવતંસશોભિતાનનમ્ ।
વેણુવાદ્યમત્તઘોષસુન્દરીમનોહરં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૬॥

ગર્વિતામરેન્દ્રકલ્પકલ્પિતાન્નભોજનં
શારદારવિન્દવૃન્દશોભિહંસજારતમ્ ।
દિવ્યગન્ધલુબ્ધભૃઙ્ગપારિજાતમાલિનં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૭॥

વાસરાવસાનગોષ્ઠગામિગોગણાનુગં
ધેનુદોહદેહગેહમોહવિસ્મયક્રિયમ્ ।
સ્વીયગોકુલેશદાનદત્તભક્તરક્ષણં
નીલવારિવાહકાન્તિગોકુલેશમાશ્રયે ॥ ૮॥

॥ ઇતિ શ્રીરઘુનાથપ્રભુવિરચિતં શ્રીગોકુલેશાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIgokuleshAShTakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*